क्र. २४

संस्कृ

# मल्हारि सहस्रनाम.

६९८ | स्तो. ३३

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

श्रीलक्ष्मीनृसिंहप्रसन्न ।। रामाचार्य अणा अष्टपुत्रे यांचि पोथि असे

॥श्रीमत्कार[illegible]॥

वाईनाट करणार स्वरिं श्रीविनायक अष्टपुत्रे ।। श्री ३ लक्ष्मीनृसिंहप्रसन्न ।।

ग्रंथसमग्र पत्रे ८

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2)

श्रीगणेशं भजे ॥ स्थितं कैलासनिलये प्राणेशं लोकशंकरं ॥ उवाच शंकरं गौरी जगद्धितचिकीर्षया ॥ १ ॥ पार्वत्युवाच ॥ देवदे
व जगन्नाथ भक्तानुग्रहकारक ॥ पृच्छामि त्वां परं चैकं दुःखदारिद्र्यनाशनं ॥ २ ॥ कथयस्व प्रसादेन सर्वज्ञोसि जगत्प्रभो ॥ स्तो
त्रं दानं तपो चापि सर्वकामफलप्रदं ॥ ३ ॥ ईश्वर उवाच ॥ मार्तंडभैरवो देवो मल्लारिरहमेव हि ॥ तस्य नामसहस्रं ते वदामि शृणु
भक्तितः ॥ ४ ॥ सर्वलोकार्त्तिशमनं सर्वसंपत्प्रदायकं ॥ पुत्रपौत्रादिफलदं स्वर्गमोक्षप्रदं शिवं ॥ ५ ॥ ईश्वरोस्य ऋषिः प्रोक्त
श्छंदोनुष्टुप्प्रकीर्त्तितं ॥ मल्लारिर्म्हालसायुक्तो देवता समुदीरिता ॥ ६ ॥ सर्वपापक्षयद्वारा मल्लारिप्रीतये तथा ॥ समस्तपुरु
षार्थस्य सिद्ध्यै विनियोजनं ॥ ७ ॥ मल्लारिर्म्हालसानाथो मेघनाथो महीपतिः ॥ मैरालः खड्गराजश्चेत्यमीभिर्नाममंत्रकैः ॥ ८ ॥
एतैर्न्मौलिशिरोमाद्यैः करयोश्च हृदादिषु ॥ न्यासषट्कं पुरस्कृत्वा ध्यात्वा नामावलिं जपेत् ॥ ९ ॥ ईश्वराय ऋषये नमः मूर्ध्नि अनु
ष्टुप्छंदसे नमः मुखे ॥ म्हालसायुक्तमल्लारये देवतायै नमः हृदये ॥ श्रीमल्लारिप्रीतये विनियोगः ॥ ॐ मल्लारये नमः हृदयाय
नमः ॥ ॐ म्हालसानाथाय नमः शिरसे स्वाहा ॥ ॐ मेघनाथाय नमः शिखायै वषट् ॥ ॐ महीपतये नमः कवचाय हुं ॥ ॐ मै
रालाय नमः नेत्रत्रयाय वौषट् ॥ ॐ खड्गराजाय नमः अस्त्राय फट् ॥ इति मंत्रैरंगुष्ठादिषु हृदयादिषु च न्यस्य ॥ ध्यायेन्मल्लारि
देवं कनकगिरिनिभं म्हालसाभूषितांकं श्वेताश्वं खड्गहस्तं विबुधबुधगणैः सेव्यमानं कृतार्थैः ॥ युक्तांघ्रिं दैत्यमूर्ध्नि डमरुवि ॥ १ ॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3)

१० भवः रूपालुर्विश्वात्मा धर्मपुत्रार्तिभीतिहा ॥१४॥ रुद्रोधियज्ञः श्रीकंठः पंचवक्त्रः सुखैकभूः ॥ प्रजापालोविशेषज्ञः श्चतुर्वक्त्रः
प्रजापतिः ॥१५॥ खड्गराजः रूपासिंधुर्मल्लसैन्यविनाशनः ॥ अद्वैतः पावनः पाता परार्थैकप्रयोजनः ॥१६॥ ज्ञानसाध्योमल्ल
हरः पार्श्वस्थमणिकासुरः ॥ अष्टधाभजनप्रीतो भर्गोमन्मयचेतनः ॥१७॥ महीमयमहामूर्त्तिर्महीमयलसत्तनुः ॥ उल्ला
लखड्गोमणिहामाणिर्दैत्यरूतस्तुतिः ॥१८॥ सप्तकोटिगणाधीशोमंगनाथोमहीपतिः ॥ महातनुः खड्गराजोमल्लस्तोत्रवरप्र
दः ॥१९॥ प्रतापिदुर्जयः सेव्यः कलाचान्द्रिश्वरंजकः ॥ स्वर्णवर्णोद्भुताकारः कार्त्तिकेयोमनोजवः ॥२०॥ देवद्विसकरपूर्णोमणि
स्तोत्रवरप्रदः ॥ इंद्रः सुरार्चितोराजाशंकरोभूतनायकः ॥२१॥ शांतः शाश्वतईशानः पवित्रः पुण्यपूरुषः ॥ अग्निपुष्टिप्रदः पू
ज्योदीप्यमानः सुधाकरः ॥२२॥ भावीसुमंगलः श्रेयान्पुण्यमूर्त्तिर्यमोमनुः ॥ जगद्भीतिहरोहासीशरणागतभीतिहा ॥२३॥ मल्ल
द्वेषमाणिद्वेषाखड्गराण्म्हालसापतिः ॥ आधिहाव्याधिहाव्यालीवायुः प्रेमपुरप्रियः ॥२४॥ सराप्पुष्टिनिधीशाय्यः सुधामानि
तिनप्रदः ॥ ईशानः सर्वयोजाप्योभजत्कामप्रदः परः ॥२५॥ अनर्घ्यः शंभुरार्त्तिघ्नोमैरालः पशुपालकः ॥ गंगाप्रियोजगत्त्रा
ताखड्गराण्णयकोविदः ॥२६॥ अगण्योवरदोवेधा जगन्नाथः सुराग्रणीः ॥ गंगाधरोद्भुताकारः कामहाकामदोमतः ॥२७॥ त्रि
नेत्रः कामदमनोमणिमल्लदयार्द्रहृत् ॥ मल्लदुर्मतिनाशांघ्रिर्मल्लासुररूतस्तुतिः ॥२८॥ त्रिपुरारिर्गणाध्यक्षोविनीतोमुनि ॥२॥

(५)

स॰ पूरगोरक्षतधीः कार्यकर्त्ताक्षताध्वरः॥४३॥तुष्टिप्रदस्तमोहंतानादलुब्धः स्वयंविभुः॥सिद्धनाथोयोगनाथोमंत्रोद्धारो
गुहप्रियः॥४४॥श्रमहाभगवान्भव्यः शास्त्रचक्षुक्षालितागुभः॥अश्वारूढोवृषस्कंधोधृतिमान्वृषभध्वजः॥४५॥अ
वधूतः सदाचारः सदातुष्टः सदामुनिः॥वदान्योमल्लसानाथः खड्गेशः शामवान्पतिः॥४६॥अलेखनीयः संसारीसारस्व
यभिपूजितः॥सर्वशास्त्रार्थनिपुणः सर्वमायान्वितोरथी॥४७॥हरिचंदनलिप्तांगः सिंदूरांकितसत्तनुः॥कस्तूरीशोभितस
नुदः कुंकुमागुरुलिप्तकः॥४८॥अमोघोवरदः शोभः शिवनामाजगाद्धितः॥भस्मांगरागः सुकृतीसर्पराजोत्तरीयकः॥४९॥
बीजाक्षरंमंत्रराजोमस्फुरद्दीप्तिवाल्लकः॥५०॥मत्यदृष्टिनिवारणः॥प्रियंवदोमहारावोमैलुखु नरनाथोमहाप्राज्ञोजय
वान्सुरपुंगवः॥धनराट्कक्षोभहृद्दंशः सुसैन्योहेममालिकः॥५१॥आत्मारामोवृष्टिकर्त्तानरोनारायणः प्रियः॥प्राणस्थो
जयसन्नादोमेघस्थोमेघशब्दवान्॥५२॥सुश्राव्यशब्दः सत्तस्यस्तीर्थवासीसुपुण्यदः॥भैरवोगगनाकारः सारमेयसमा
कुलः॥५३॥मायार्णवमहासेतुर्मल्लासुरकृतस्तुतिः॥त्र्यंबकोमहाधैर्योदृशाहस्तोद्भुतंकरः॥५४॥गुर्वर्थदः सतांनाथोदश
वक्त्रवरप्रदः॥सत्क्षेत्रवासः सद्धस्त्रोभूरिदोभयभंजनः॥५५॥कल्पनारहितः कल्पः सुज्जीकृतधनुर्धरः॥क्षीरार्णवमहा
क्रीडः सप्तसागरसज्जितः॥५६॥सप्तन्नोकसदावासः सप्तपातालवासकृत॥प्रलयाग्निजदोषग्रः शार्वस्त्रिभुवनेश्वरः ॥३॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

म०स० कः ॥ मणिमल्लवधोद्विक्तो धर्मपुत्रप्रियंकरः ॥ ७२ ॥ मणिकासुरसंहर्त्ता विष्णुस्तुत्यनियोजकः ॥ अक्षरो मातृकारूपः पि
शाचगणमंडितः ॥ ७३ ॥ चामुंडानवकोटीशः प्रधानं मातृकापतिः ॥ त्रिमूर्त्तिर्मातृकाचार्यः सांख्ययोगोष्टभैरवः ॥ ७४ ॥
मणिमल्लसमुद्भूतविश्वपीडानिवारणः ॥ हुंफड्वौषड्वषट्कारो योगिनीचक्रचालकः ॥ ७५ ॥ त्रयीमूर्त्तिः सुरारामस्त्रिगुणो
मातृकामयः ॥ चिन्मात्रो निर्गुणो विष्णुर्वैष्णवाद्यखिलगुणान्वितः ॥ ७६ ॥ खड्गोद्धृततनुः सोहं हंसरूपश्चतुर्भुजः ॥ पद्मोद्भ
वो मातृकार्थयोगिनीचक्रपालकः ॥ ७७ ॥ जन्ममृत्युजराहीनो योगिनीचक्रनायकः ॥ आदिसोल्यागमाचार्यो योगि
नीचक्रवल्लभः ॥ ७८ ॥ सर्गस्थितिसंतरुद्धीदाकारुण्यशरीरवान् ॥ आकारवान्हरिर्धाता शिवलिंगार्चनप्रियः ॥ ७९ ॥
प्रांशुः पाशुपताच्यांघ्रिर्हुतभुग्यज्ञपूरुषः ॥ ब्रह्मण्यदेवो गीतज्ञो यागो मायाप्रवर्त्तकः ॥ ८० ॥ आपदुद्धारणो गुणश्रेष्ठो गंगामौलिः
पुराणवित् ॥ व्यापी विरोधहरणो भारहारी नरोत्तमः ॥ ८१ ॥ ब्रह्मादिवर्णो नामारः सुरसंघमनोहरः ॥ विश्वंपातीर्दिशांनाथो
वायुवेगो गवांपतिः ॥ ८२ ॥ अब्रूपी पृथिवीरूपस्तेजोरूपोनलोनिलः ॥ आकाशरूपी नादज्ञो रागज्ञः सर्वगः खगः ॥ ८३ ॥
अगाधो धर्मशास्त्रज्ञो ह्येकराण्निर्मलो विभुः ॥ धूतपापो गीर्णविषो जगद्योनिर्विधानवित् ॥ ८४ ॥ जगत्पिता जगद्बंधु
र्जगद्धाता जनाश्रयः ॥ अगाधो बोधवान्वोढा कामरूपी हतासुरः ॥ ८५ ॥ अणुर्महान्कृशः स्थूलो वशी विद्वान्धनाधरः ॥ 

(6)

म०स० श्वपाद्विश्वतश्चक्षुर्विश्वतोबाहुरच्युतः॥१००॥विश्वतोमुखआधारस्त्रिपादिकृतिरव्ययः॥व्यासोव्यासगुरुःसि
द्धःसिद्धिःसिद्धिनायकः॥१॥जगदात्माजगत्प्राणोजगन्मित्रंजगत्प्रियः॥देवसूर्वेदभूर्विश्वसर्गस्थितिसंतरलेकृत्॥२॥
सिद्धचारणगंधर्वयक्षविद्याधरार्चितः॥गरुडंतोहल्वधरोगदापाणिर्निरंकुशः॥३॥सहस्राक्षोनगोद्धारःसुरानीकज
यावहः॥चतुर्वर्गःकृष्णवर्त्माकाल्निनूपुरतोडरः॥४॥ऊर्ध्वरेतावाक्पतीशोनारदादिमुनिस्तुतः॥चिदानंदतनुर्यज्ञस्त
पस्वीकरुणार्णवः॥५॥पंचाग्नियागसंस्थारुडनंतगुणनामभृत्॥त्रिवर्गःसूदितारातिःसुरत्नत्रयीतनुः॥६॥याय
जूकश्चिरंजीवीरत्नरत्नंसहस्रपात्॥भाल्लचंद्रश्चरासाःसूर्यमंडलमध्यगः॥७॥अनंतशीर्षात्रेताग्निःप्रस
न्नेषुनिषेवितः॥सच्चिन्नेपरमानंदोनिरातंकःपरायणः॥८॥पुराणोनिर्विकारःपूर्णार्थःपुण्यवैभवः॥निराश्रयोऽश
मीगर्भोनरोनारायणात्मकः॥९॥वेदाध्ययनसंतुष्टश्चिलारामोनरोत्तमः॥अपारश्चिषणःसव्यास्त्रिवल्निर्गुणःसागरः
१०॥निर्विकारःक्रियाधारःसुरमित्रंसुरेष्टकृत्॥आखुवाहश्चिदानंदःसकलप्रपितामहः॥११॥मनोनिष्ठस्तपोनिष्ठोम
णिमल्लविमर्दनः॥उदयाचलअभ्यक्षोग्रहव्यग्रहनिवारणः॥१२॥श्रोतावक्ताशिशुपालःस्वस्तिदःसलिलाधिपः॥
वर्णाश्रमविशेषज्ञःपर्जन्यःसकलान्निजितः॥१३॥विश्वेश्वरस्तपोयुक्तःकलिदोषविनाशनः॥वर्णवान्वर्णरहितो ॥५॥

(7)

म०स० ब्रह्मांडोदरमध्यक्षेत्रं स्वरवर्णो निरूपितः ॥ वेदांतवचनातीतो वर्णाश्रमपरायणः ॥२४॥ दग्धदर्पोभयरूपैः क्रोमेनापतिसम
र्चितः ॥ सत्वस्थः सकलद्रष्टा कृतपर्णाश्रमस्थितिः ॥२०॥ वर्णाश्रमपरित्राता सर्वाभूद्रादिवर्णवान् ॥ वसुधोद्धारकरणः का
लोपाधिः सद्गतिः ॥३१॥ दैतेयसूदनो नीतस्मृतिज्ञो वडवानलः ॥ समुद्रमथनाचार्यो विनष्टो यज्ञदैवतं ॥३२॥ दृष्टादृष्टक्रि
यातीतो हेमाद्रिर्हरिचंदनः ॥ निषिद्धनास्तिकमतिर्यज्ञभुक्पारिजातकः ॥३३॥ सहस्रभुजहा शांतः पापारिः क्षीरसागरः ॥
राजाधिराजः संतानः कल्पवृक्षस्तनूनपात् ॥३४॥ धन्वंतरिर्दिव्यकाचिताभस्मांगवांछुचिः ॥ काशीश्वरः शोणभद्रो
बाणासुरवरप्रदः ॥३५॥ रजस्थः खंडिताधर्मो अभिचारनिवारणः ॥ मंदरो यागफलदस्तमस्थो दमवान् शमी ॥३६॥ वर्णाश्र
मानंदपरो दत्तापफलप्रदः ॥ कपिलस्त्रिगुणानंदः सहस्रफणासवितः ॥३७॥ कुबेरो हिमवान् शास्त्रं त्रयीधर्मप्रवर्त्तकः ॥ आ
दिष्टांतेयज्ञफलं शक्तित्रयनिवारणः ॥३८॥ दुर्वासाः पितलानकशो वीरसिंहः पुराणवित् ॥ अग्निमीळेस्फुरन्मूर्त्तिः स्वांतर्ज्यो
तिः स्वरूपकृत् ॥३९॥ सकलोपनिषत्कर्त्ता खांबराप्रणमोचनः ॥ तत्त्वज्योतिः सहस्रांशुरिषेत्वोर्जेल्लसत्तनुः ॥४०॥ यो
गज्ञानमहाराजः सर्ववेदांतकारणं ॥ योगज्ञानसदानंदो अग्न आयाहिरूपवान् ॥४१॥ ज्योतिरिंद्रियसंवेद्यः स्वाधिष्ठान
विजृंभकः ॥ अखंडब्रह्मखंडश्रीः शन्नोदेवीस्वरूपवान् ॥४२॥ योगज्ञानमहाबोधो रहस्यक्षेत्रगोपकः ॥ भ्रूमध्यवेध ॥६॥

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

म०स० सुरूपतां ॥ न स पत्नीमपि स्वप्ने वैधव्यं नाप्नुयात्क्वचित् ॥ ५८ ॥ लभेत्प्रीतिमुदासीना पतिशुश्रूषणे रता ॥ सर्वाधिकं वरं कन्या
विरहं न कदापि च ॥ ५९ ॥ जातिस्मरत्वमाप्नोति पठनाच्छ्रवणादपि ॥ सबलश्रीः सरलां वाणीं कवित्वं कविताप्रियः ॥ ६० ॥
प्रज्ञातिशयमाप्नोति पठतां ग्रंथधारणे ॥ निर्विघ्नां सिद्धिमाप्नोति यः पठेद्ब्रह्मचर्यवान् ॥ ६१ ॥ सर्वरक्षाकरं श्रेष्ठं दुःस्वप्नग्रह
निवारणं ॥ सर्वोत्पातप्रशमनं बालग्रहविनाशनं ॥ ६२ ॥ दुष्टापस्मारकुष्ठादिहरणं पुण्यवर्द्धनं ॥ आयुर्वृद्धिकरं चैव पुष्टि
संतोषवर्द्धनं ॥ ६३ ॥ विषमे पथि चौरादिसंतापे कलहागमे ॥ ६४ ॥ रिपूणां सन्निधाने च नियमेन पठेदिदं ॥ मनःक्षोभे विषा
दे वा हर्षोत्कर्षे तथैव च ॥ ६५ ॥ इष्टारंभे समाप्तौ च पठितं यंत्रयत्नतः ॥ समुद्रतरणे पोतमंथने गिरिरोहणे ॥ ६६ ॥ कर्षणे
गजसिंहादौ सावधानं पठेदिदं ॥ अवर्षणे महोत्पाते दुरयपमये तथा ॥ ६७ ॥ शतवारं पठेत्तत्सर्वदुष्टोपशांतये ॥ शनिवारर्के
वारे वा षष्ठ्यां वा नियतं पठेत् ॥ ६८ ॥ मल्लारिं पूजयेद्विप्रान्भोजयेद्भक्तिपूर्वकं ॥ उपवासमथो नक्तमेकभक्तमयाचितं ॥ ६९ ॥
यथाशक्ति प्रकुर्वीत जपेत्संपूजयेच्छुनेत ॥ प्रतिपत्तिथिमारभ्य षष्ठ्यंतं शुक्लपक्षके ॥ ७० ॥ अग्रे षष्ठ्या पठेद्दत्त होमं पूजां तथैव
च ॥ भोजयेदग्रवर्ध्येव ब्राह्मणांश्च सुवासिनीः ॥ ७१ ॥ नानाजातिभवान्भक्तान्पूजयेदनिवारितं ॥ नानापरिमलैर्द्रव्यैः पल्ल
वैः कुसुमैरपि ॥ ७२ ॥ दमनोशीरपाच्यादि तत्तत्कालोद्भवैः शुभैः ॥ नैशाभांडारचूर्णेन नानारंजिततंडुलैः ॥ ७३ ॥ पूजयेन्मा ॥ ७ ॥

म०स० ऐहिकंसकलंभुक्त्वाशेषेस्वर्गमवाप्नुयात्॥८८॥मुमुक्षुर्लभतेमोक्षंपठन्निदमनुत्तमं॥सर्वक्रतुफलंतस्यसर्वतीर्थफलं
लभेत्॥८९॥सर्वदानफलंतस्यमल्लारिर्येनपूजितः॥मल्लारिरितिनामैकंपुरुषार्थप्रदंध्रुवं॥९०॥सहस्रनामविद्यायाः
कःफलंवेत्तिसंस्तुतः॥वेदस्याध्ययनेपूर्णेयोगाभ्यासेचयत्फलं॥९१॥सकलंश्रेयआप्नोतिमल्लारिर्भजनात्प्रिये॥त
वप्रीत्यैमयाख्यातंलोकोपकृतिकारणात्॥९२॥सहस्रनाममल्लारेःकिमन्यछ्रोतुमिच्छसि॥९३॥इतिश्रीब्रह्मां
डपुराणेशिवोपाख्यानेमल्लारिप्रकृतिभावेमल्लारिप्रस्तावेशिवपार्वतीसंवादेमल्लारिसहस्रनामस्तोत्रंसंपूर्णं
॥ ॥७॥श्रीमार्तंडार्पणमस्तु॥ ॥श्रीभवानीशंकरार्पणमस्तु॥ ॥शुभंभवतु॥ ॥श्रीरस्तु॥ ॥७॥

Digital property of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

# मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com